दिनाङ्क :- 01.10.2026

प्रातः - 06:55

## प्रधानमन्त्री - सङ्घलोकसेवायोगः

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां 'भारतमण्डपम' इत्यत्र सङ्घलोकसेवायोगस्य शताब्दीसमारोहे सहभागं करिष्यति। सः अस्मिन्नवसरे आयोजितं कार्यक्रममपि सम्बोधयिष्यति। अयं कार्यक्रमः विगतवर्षस्य अक्टूबर-मासस्य प्रथमदिनाङ्कात् प्रारब्धानाम् आवर्षं यावत् प्रवर्तमानानां समारोहाणां समापनसूचकः भविष्यति। षड्विंशत्यधिक-नवदश-शततमे वर्षे सङ्घलोकसेवायोगस्य स्थापनायाः शतवर्षपूर्त्यवसरे एतस्य समारोहस्य आयोजनं भवति। श्रीमोदी सङ्घलोकसेवायोगस्य शताब्दी-स्मारक-नाणकम् अथ स्मारक-प्रैष्यचिटिकां च प्रख्यापयिष्यति तथा '100 Landmark Judgements - Shaping the Policies of UPSC and Public Service Commissions in India' इति नाम्ना एकस्य पुस्तकस्य विमोचनमपि करिष्यति।

## मन्त्रिमण्डलम्

मन्त्रिमण्डलस्य आर्थिककार्यसमित्या ह्यः अग्रिमवित्तीयवर्षस्य (2027-2028) रबीविपणनसत्रस्य सर्वेषां सूचितानां सस्यानां न्यूनतमसमर्थनमूल्यं वर्धयितुम् अनुमोदनं प्रदत्तम्। केन्द्रीयसूचनाप्रसारणमन्त्री अश्विनीवैष्णवः नवदिल्ल्यां केन्द्रीयमन्त्रिमण्डलस्य उपवेशनानन्तरं वार्ताहरान् सम्बोधयन् उक्तवान् यत् कृषकेभ्यः तेषां कृष्युत्पादानां लाभकरं मूल्यं सुनिश्चेतुं निर्णयः अयं गृहीतः।

अनेन कुसुम-सस्यस्य समर्थन-मूल्ये सर्वाधिकं पञ्चसप्तत्युत्तरषट्शतरूप्यकाणां, सर्षपस्य त्रयोदशोत्तरचतुःशतं, चणकस्य त्रयाशीति, गोधूमस्य च पञ्चविंशति रूप्यकाणां प्रति-क्विण्टल्-मितं परिवर्धनं विहितम्। एतदतिरिच्य, मन्त्रिमण्डलेन 'हरित-ऊर्जा-वीथि' इत्यस्य तृतीय-चरणम्, अथ ऐतिहासिकी 'पीएम-धारा' योजना च समनुमोदिता, येन राज्येषु केन्द्रशासित-प्रदेशेषु च पञ्चत्रिंशदधिक-शत-गीगावाट-परिमितस्य नवीकरणीय-ऊर्जा-उत्पादनस्य सुगम-सञ्चारणं भविष्यति।

## ऋतुविभागः

भारतर्तुविज्ञान-विभागेन अद्य तटीय-कर्णाटक-केरलम-माहे-आन्तरिक-कर्णाटक-तमिलनाडु-पुडुचेरी-कराईकल् चेत्येषु प्रदेशेषु विद्युद्गर्जनेन सह प्रबलवृष्टिः पूर्वानुमानिता। ऋतुविभागेन अद्य नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-प्रदेशेष्वपि समानैव ऋतु-परिस्थितयः प्रवर्तिष्यन्ते इति सम्भावना अभिव्यक्ता। विभागेन उक्तं यत् रायलसीमा-आन्तरिक-कर्णाटक-ओडिशा-अरुणाचलप्रदेश-असम-मेघालय-प्रदेशेषु अपि विद्युद्गर्जनेन सह विद्युत्पातस्य च सम्भावना अस्ति।

## एशियाक्रीडाः

जापानदेशे प्रवर्तमानासु एशियाक्रीडासु भारताय ह्यः अद्यावधि सर्वाधिकः सफलदिवसः अभवत्। भारतेन चत्वारि सुवर्णपदकानि प्राप्तानि। अनेन भारतस्य पदकसङ्ख्या आहत्य षष्टिः अभवत्, यस्मिन् दश-सुवर्णपदकानि, एकविंशति-रजतपदकानि तथा एकोनत्रिंशत्-कांस्यपदकानि सन्ति।

महिलानां हॉकीक्रीडायां भारतं ह्यः दक्षिणकोरियादलं द्वि शून्यम् इत्यङ्कैः पराजित्य निर्णायकचक्रे प्रविष्टम्। स्क्वाश्-क्रीडायां भारतस्य पुरुषदलं महिलादलं च उपान्त्यचक्रे प्रविष्टे, येन भारताय द्वे अन्ये पदके सुनिश्चिते। शीर्षक्रमाङ्कितं गतविजेतृ-पुरुषदलं कुवैतदलं द्वि शून्यम् इत्यङ्कैः पराजितवत्, महिलादलं च सिङ्गापुरदलं द्वि शून्यम् इत्यङ्कैः एक पराजितवत्।

क्रिकेट्

पुरुष-क्रिकेट्क्रीडायां, ह्यः रात्रौ गुवाहाटीनगरस्य बरसापारा-क्रीडाङ्गणे आयोजितायाः त्रिस्पर्धायाः एकदिवसीय-अन्ताराष्ट्रिय-शृङ्खलायाः द्वितीयायां स्पर्धायां भारतं वेस्ट्-इण्डीज्-दलम् अष्टस्तोभैः पराजित्य शृङ्खलायां द्वि शून्यम् इत्यन्तरालेन अग्रे अस्ति। स्पर्धायाम् उत्कृष्टप्रदर्शनाय शुभमनगिल् श्रेष्ठक्रीडकः घोषितः।

।। इति वार्ताः।।